राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - १५८
ISSN - 2231-0452

उत्कर्षदीपिका
Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः

सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः - २०२३)

शोधलेखानुक्रमः

क्र.स.	विषयः	पुटाङ्कः
१.	**भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि** – प्रो.रामसलाहीद्विवेदी	1
२.	**कालिदासीयाः केचनापत्यप्रत्ययान्ताः** – प्रो.जयकान्तसिंहशर्मा	5
३.	**सांख्यदर्शने मोक्षस्यावधारणा** – प्रो.सुजातात्रिपाठी	15
४.	**ईश्वरस्वरूपमीमांसा** – प्रो.मारकण्डेयनाथतिवारी	21
५.	**विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्** – डॉ. दयाल सिंह पंवार	34
६.	**न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः** – प्रो. बिष्णुपदमहापात्रः	38
७.	**शिक्षाशास्त्रे नवीनाः विचाराः** – आचार्य. के. भरतभूषणः	46
८.	**वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे** – प्रो.प्रभाकरप्रसादः	52
९.	**वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः** – प्रो. प्रेम कुमार शर्मा	
१०.	**भारतीयजैनज्ञानपरंपरा** – प्रो.अनेकांतकुमारजैनः	

महस्विन्याः विशेषाङ्कः - उत्कर्षदीपिका
विद्वत्समीक्षिता मूल्याङ्किता च शोधपत्रिका (ISSN: 2231-0452), वर्षम् : २०२३

शिक्षाशास्त्रे नवीनाः विचाराः

आचार्यः के. भरतभूषणः*

नवीनविचारस्य नूतनचिन्तनस्य च प्रादुर्भावः तत्कालस्य (वर्तमाने) आवश्यकतां मनसि निधाय उच्चस्तरचिन्तनस्य प्रभावेण क्रियात्मकदृष्ट्या जायते लोकव्यवहारेण प्रयोगेण च यत् अनुभूतम्, अवलोकितं वा तत्सर्वं नूतनमेव। अत्र प्राप्तस्य अथवा अर्जितपूर्वज्ञानस्याधारेण नूतनज्ञाने प्रवेशः यदा भवति तदा प्राप्तस्य अवशिष्टस्य ज्ञानस्य क्रियान्वयने कालभेदेन, रुचिभेदे, वैयक्तिकभेदेन च विभिन्नपरिणामेण समाजे प्रायः सर्वत्र विशिष्टं ज्ञानं जायते। तत् शिक्षायाः क्षेत्रेऽपि पूर्णतः अंशतः वा अनुभूयते।

महर्षिवेदव्यासेन समस्तरूपवेदानां नूतनतया चिन्तनेन ऋक्-यजुस्-सामाथर्वणमिति विभक्तम्। तदपि नूतनप्रयासेन। तदाधारेण अद्यापि वेदाध्यायिनः स्वीयशाखानुगुणं वेदाध्ययनेन वेदानां संरक्षणमपि कुर्वन्तस्सन्ति। क्रमशः वेदोक्तविषयाणां सामान्यजीवने प्रसारणदृष्ट्या दृष्टान्तेन कथाद्वारा प्रकृतीनां समायोजनेन प्रतिपाद्यते।

ज्ञानस्य संरक्षणमेव अस्माकं मुख्यं लक्ष्यमस्ति। वैदिककालादारभ्य अद्यपर्यन्तं ज्ञानस्य संरक्षणदृष्ट्या वेदकालानन्तरं श्रुतिस्मृतिपुराणादिकालस्य स्मरणं क्रियते। वेदोक्तविचाराणाम् आत्मसात्करणार्थं प्रत्यक्षानुभवाय श्रुति-स्मृति-उपनिषत्पुराणकाले कथारूपेण, लोकप्रियरूपेण, सरलतया, समाजे सर्वेषामुपकाराय प्रयत्नः विहितः। तदपि नावीण्यमिति गण्यते। क्रमशः शास्त्रकाले पुनः वेदोक्तविचाराः वेदवाक्यानामाधारेण शास्त्ररूपेण समाजे दार्शनिकदृष्ट्या प्रतिपादिताः। तत्काले तदपि नवीनमेव। यद्यपि चिन्तनम् एकस्योपरि आसीत् तदाऽपि स्वीयभावानां प्रकाशने नवीनत्वं दरीदृश्यते। यथा धर्मलक्षणस्य प्रतिपादनवेलायां विभिन्नकालेन धर्मलक्षणं विदितम्। वेदेषु उपनिषत्सु सूचितेषु, स्मृतिग्रन्थेषु, संहितायां, ऋषीणां मते, पुराणेषु निर्दिष्टस्य एकस्य शब्दस्य धर्मशब्दस्य प्रतिपादनम् अवलोकयामः। तत् सर्वं नावीन्यमेव। एवमेव परिवर्तमानजगति मानवाधिकारादिविषयद्वारा अधिकाशब्देन (कर्तव्यार्थे) चिन्तनमागतम्। तत्रापि ईश्वरस्य,

* शिक्षापीठस्य प्राक्तनप्रमुखः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली